प्रवेश सं० १५९८६ | विषय: धर्मशास्त्र | क्रम सं०

नाम आशौचनिर्णय. | ग्रन्थकार अज्ञात:

पत्र सं० १-५

श्लोक सं० | अक्षर सं० (पंक्तौ) ४० | पंक्ति सं० (पृष्ठे) ११

आकार: ८.३ × ३.८ | लिपि: दे.ना. | आधार: का.

13915 ग्रा. १५७६

वि० विवरण पू.

न. १६००

पी० एस० यू० पी०—७७ एस० सी० ई०—१६४१—४० ०००

Indira Gandhi National Centre for the Arts

श्रीः गणाधिपं नमस्कृत्य प्रभूहादि पणिंकरिः । अंधकेनाल्पबोधाय क्रियतेऽशौचनिर्णयः ॥१॥ अर्भतः षड्दन्ताब्दे
ह पीनरूस्थं नतुष्यतिः स्फुटबोधाय बालानां ग्रंथोऽयं रच्यते यतः ॥२॥ अत्र प्रागुपनयनात् कामचार कामवाद काम
भक्षा इति गौतमोक्तेरनुपनीतस्यापि त्रिरात्रि संस्कारं विनाऽशौचेनाधिकारः उपनयनोत्तरमपि ब्रह्मचारिणः
पित्राद्यंत्यकर्मकरणं विनाऽशौचेऽधिकारो नास्त्यत्र तस्मात् द्विजातीनां समावर्त्तनोत्तरमाशौचाधिकारः स्त्रीशूद्र
योस्तु विवाहस्योपनयनस्थानापन्नत्वेन विवाहोत्तरमेवाशौचाधिकारः अथ जननाशौचं तत्र गर्भिण्याः
मासचतुष्टयपर्यंतं गर्भनाशः स्रावः इत्युच्यते तदा गर्भिण्या मासत्रयपर्यंतं त्रिरात्रं चतुर्थमासे चतूरात्रमा
शौचं अस्पृश्यत्वं च पित्रादिसपिंडानां स्नानमात्रेण स्नानाच्छुद्धिः गर्भिण्याः पंचमषष्ठयोर्गर्भनाशः पात इत्युच्य
ते तत्र गर्भिण्याः माससंख्यया पंचषड्रात्रिनातिक्रमेणास्पृश्यत्वावहमाशौचं पित्रादिसपिंडानां तु त्रि
रात्रं जननाशौचं मृताशौचं तु नास्ति इदं च वर्तावस्पृश्यत्वं सर्ववर्णसाधारणं वयोवस्थाविभिन्नत्वात् गर्भिण्याः
सप्तममासप्रभृतिप्रसवे सर्वेषां मातापित्रादीनां सपिंडानां दशाहं वैश्यानां ४ क्षत्रियाणां ४ पंचदशाहं शूद्राणां
मासं सत्वेदृश्यमासार्द्धं जननाशौचं मृताशौचं तु नास्ति सपत्नमातुः सर्वत्र पितृवत् जननाशौचे गर्भिण्याद

रामः
१

शाहमस्पृश्यत्वं पितुः सापत्नमातुश्च स्नानात्प्रागस्पृश्यत्वं स्नानोत्तरं स्पृश्यत्वमेव किंतु सर्वसपिंडानां कर्मान
धिकारमात्रं तत्रापि नालछेदनात्पूर्वं जातकर्मदानादौ पितुरधिकारः एवं प्रथमपंचमषष्ठदशमदिवसेषु ज
न्मदास्यदेवतापूजायां चापितुर्वचनादधिकारः कूटस्थमारभ्य सप्तपुरुषपर्यंतं सपिंडाः ततः समानोदकाः त
तः सप्तसगोत्राः सोदकानां त्रिरात्रमाशौचं सगोत्राणां स्नानमात्रं गर्भिण्या दशाहोत्तरं पुत्रोत्पत्तौ विंशतिदि
नानि कन्योत्पत्तौ मासपर्यंतं कर्मानधिकारः तत्र तद्वतामस्पृश्यत्वं कर्मानधिकारश्चेत्युभयं भवति मृत
जातशिशौ सर्वेषां सपिंडानां दशाहं जननाशौचं तु नास्ति नालछेदात्पूर्वं शिशौ मृते मातुर्दशाहं पित्रादि
सपिंडानां त्रिरात्रं जननाशौचं मृताशौचं तु नास्ति नालछेदादूर्ध्वं शिशुमरणे दशाहं जननाशौचं सर्वेषां सपिं
डानां मृताशौचं तु नास्ति दशाहाभ्यंतरे नामकरणात्प्राक् शिशुमरणे स्नानमात्रेण सपिंडानां शुद्धिः मा
तापित्रोस्त्रिरात्रं पुत्रमृतौ कन्यामृतौ त्वेकाहः नाम्नः पूर्वं खननमेव नाग्निसंस्कारः उदकदानादि अलंकरणं तु सर्वेषां
भवति नामकरणोत्तरं वर्षत्रयपर्यंतं दाहखननयोर्विकल्पः नामोत्तरं दंतोत्पत्तेः प्राक् पुत्रमरणे दाहे सपि
डानामेकाहः खनने तु स्नानाच्छुद्धिः मातापित्रोरुभयत्रापि त्रिरात्रं कन्यामृतौ तु त्रिपुरुषसपिंडानामुभय

Indira Gandhi National
Centre for the Arts

अपि स्नानाच्छुद्धिः मातापित्रोरुभयत्राप्येकाहः दंतोत्पत्तेरूर्ध्वं वर्षत्रयपर्यंतं पुत्रमरणे दाहे खनने त्रासपिंडाना
मेकाहः मातापित्रोस्त्रिरात्रम् कन्यामृतौ तु त्रिपुरुषं स्नानाच्छुद्धिः मातापित्रोः सपिंडानां × … नास्ति तत्र
माशौचम् प्रथमवर्षादेरकृतचूडस्य पुत्रस्य मरणे पित्रादिसपिंडानां त्रिदिनमाशौचं विपत्तमृदाहश्चानियतः
त्रिवर्षोर्ध्वं कृतचूडस्याकृतचूडस्य वा पुत्रस्यानुपनयमातापित्रादिसर्वसपिंडानां त्रिदिनमाशौचं दाह एवउ
दकदानादित्तं षष्ठीकृतचूडस्येष्टमोपिंडदानं तूष्णीं कन्यायाः वर्षत्रयानंतरं वाग्दानात्प्राक् मरणे त्रिपुरुषस
पिंडानामेकाहः मातापित्रोस्त्रिदिनं दाहोदकदानादि तूष्णीमिति वाग्दानोत्तरं प्राक् संस्कारात्तत्र विवाहा ×
न्यासु भर्तृकुले पितृकुले च सप्तपुरुषसपिंडानां पित्रादीनां सर्वेषां त्रिरात्रमाशौचम् दाहोदकदानादि
तूष्णीं उपनयनोत्तरं मृतस्य पुरुषस्य सर्वेषां सपिंडानां विप्राणां दशाहं क्षत्रियाणां द्वादशाहं वैश्यानां
पंचदशाहं शूद्राणां मासं संस्कृताणां मासार्धं सोदकानां त्रिरात्रं गोत्रजानां स्नानाच्छुद्धिः विवाहोर्ध्वं क
न्यायाः पितृगृहे मरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रं पितृव्यादीनामेकाहः ऊढायाः कन्यायाः पितृ
गृहे प्रसवे मातापित्रोस्त्रिरात्रं सोदरस्यैकरात्रं पितृव्यादीनामेकाह इति केचित् ऊढायाः कन्यायाः पति एम:
२

गृहे प्रसवे पित्रादीनामाशौचं नास्ति ऊढायाः कन्यायाः पितृगृहे मरणे मातापित्रोस्त्रिरात्रम् मातापित्रोर्मरणे ऊढ
पुत्र्यास्त्रिरात्रं दशाहांतः दशाहोर्ध्वकालांतरे वत्सरांतेपि पक्षिणी अत्रैवातिक्रांताशौचं मेल वचनाज्जनतिमात्रं
मातृभगिन्योः परस्परगृहमरणे परस्परं त्रिरात्रम् गृहांतरमृतौ परस्परं पक्षिणी मातुलमरणे भगिन्याप
त्यस्य पक्षिणी उपकालमातुलमरणे तु त्रिरात्रं मातुलान्यामरणे भर्तृभगिन्यपत्यस्य पक्षिणी उपनीतभगिनेयम
रणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रम् अनुपनीते मृते तु मातुलस्य मातुलभगिन्याश्च पक्षिणी मातामहमरणे
दुहितृपत्यस्य त्रिरात्रं दौहित्रमरणे मातामहस्य मातामह्याश्च त्रिरात्रं अनुपनीते मृते तु मातामहस्य मातामं
ह्याश्च पक्षिणी मातामह्यां मृतायां दुहितृपत्यस्य पक्षिणी श्वश्रूश्वशुरयोर्मृतौ जामातुः संनिधौ त्रिरात्रं असं
निधौ पक्षिणी ग्रामांतरे चैकरात्रं जामातरि मृते तु श्वश्रूश्वशुरयोः स्नानाच्छुद्धिः एकाहमाशौचमिति केचित्
श्यालके मृते भर्तृभगिनीभर्तुरेकाहः श्यालकसुतमरणे स्नानमात्रं पितृष्वसरि मृतायां भ्रात्रपत्यस्य पक्षिणी
मातृष्वसरि मृतायां स्वस्रपत्यस्य पक्षिणी आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्राः आत्मबांधवाः पितुः
पितृष्वसृमातृस्वसृमातुलपुत्राः पितृबांधवाः मातुः पितृष्वसृमातृस्वसृमातुलपुत्राः मातृबांधवाः इदं च भ्रत्र

Indira Gandhi National Centre for the Arts

यांतेषु मृतेषु पक्षिणी। पितृष्वस्रादिकन्यानां ऊढानां तु मरणे एकाहः दत्तकमृतौ पूर्वापर[..]पित्रोस्त्रिरात्रं सपिंडा
नामेकाहः पूर्वापरपित्रोर्मृतौ दत्तकस्य त्रिरात्रं दत्तकस्य पुत्रपौत्राणां मरणे जनने वा सपिंडानामेकाहः स
पिंडपुत्रीकृते दत्तके तु मृते सपिंडानां दशाहमेव आचार्यमरणे शिष्यस्य त्रिरात्रं तत्पुत्रपत्न्योर्मरणे एका
हः उपनीयाध्यापक आचार्य इत्युच्यते वेदैकदेशाध्यापक उपाध्यायः तन्मरणे शिष्यस्यैकरात्रं शिष्य
स्य स्वोपनीतस्य मरणे गुरोस्त्रिरात्रं परोपनीतस्य मरणे तु एकरात्रं सहाध्यायिनो मृतौ एकग्रामीणयो
रनूचानश्रोत्रिययोर्मृतौ चैकाहः सांगवेदाध्यायी अनूचानः वेदमात्राध्यायी श्रोत्रियः अध्ययनशब्दस्यार्थ
स्य अर्थज्ञानपर्यंतत्वं साध्यित्वं न्यायसिद्धं असपिंडस्यापि श्रोत्रियस्य मे भ्यादिसंबद्धस्य गृहे मरणे तद्गृह
स्वामिन एकरात्रं जातप्रसूयतोः षंढे च मृते पुत्रमृते च सपिंडानां स्नानमात्रं अथातिक्रांताशौचं तत्र
जननातिक्रांताशौचं नास्ति पितुः स्नानं तत्रापि भवति मृतके पि अनुपनीतमरणादिनिमित्तकत्रिरा
त्रादिषु भगिनीमातुलादिमरणनिमित्तत्रिरात्रादिषु च अतिक्रांताशौचं नास्ति किंतु दशाहादिमृताशौ
चविषयमेव दशाहमध्ये जनने मरणे वा ज्ञाते पुनः आदिमांशे शेषेणैव शुद्धिः संस्कारमपि शेषेणैव स रामः

३

मापयेत् अस्थिपर्णशरसंस्कारमपि समापयेत् शेषेणैव आद्यत्रिरात्रमध्ये समानोदकम[..]रणे ज्ञाते समानोद
कानां शेषेणैव शुद्धिः त्रिरात्रे अतिक्रांते तु दशाहमध्ये ज्ञाते पि नाशौचं किंतु स्नानमात्रं अयमेव न्यायः मातुलादि
त्रिरात्रादिषु ज्ञेयः मातापित्रोर्मरणे दूरदेशे पि वत्सरानंतरमपि श्रवणे पुत्रो दशाहादि पूर्णमेवाशौचं कुर्यात्
स्त्रीपुंसयोः परस्परमरणे परस्परदेशांतरे वत्सरांते पि पूर्णं दशाहादि भवति सपत्नीषु परस्परमृतौ परस्प
रदेशकालानपेक्षं दशाहादि पूर्णमाशौचं भवति सापत्नमातुर्मरणे संवत्सरोर्ध्वमपि विदेशे पि त्रिरात्रं औ
रसपुत्रे मृते संवत्सरोर्ध्वमपि देशांतरे पि मातापित्रोस्त्रिरात्रम् दशाहोर्ध्वमेकदेशे ज्ञातिमरणे मासत्रयपर्यं
तं त्रिरात्रं षण्मासपर्यंतं पक्षिणी नवममासपर्यंतमेकदिनं तदनंतरं स्नानमिति वृद्धवसिष्ठः मासत्रयपर्यं
तं त्रिरात्रं षण्मासपर्यंतं पक्षिणी व[..]पर्यंतमेकरात्रं तदूर्ध्वं स्नानमिति माधवे देवलः अत्रापि आपादनापि
षयत्वेन व्यवस्था दशाहोर्ध्वं देशांतरे ज्ञातिमरणे ज्ञाते त्रिपक्षपर्यंतं त्रिरात्रं ततो षण्मासपर्यंतमहोरात्रं ततो
वर्षपर्यंतं दिवाश्रवणे आसायं रात्रिश्रवणे आप्रातराशौचं वत्सरांते स्नानाच्छुद्धिः इदमतिक्रांताशौचं सर्वव
र्णसाधारणं अत्र देशांतरमरणे ज्ञाते स्नानाच्छुद्धिरिति केचित् तन्माधवोदाहृतविष्णुस्मृत्यस्थानविलसित

Indira Gandhi National
Centre for the Arts

मितित्येवं। देशांतरं तु विंशतियोजनात्परम्। क्वचित्पक्षस्य चतुर्विंशतियोजनात्परम्। वैशपस्य स्तूरुस्य वा त्रिंशद्यो
जनात्परं। अन्ये तु कृष्णस्य षष्टियोजनात्परं तेयम्। पक्षांतराणि तु उक्तपक्षानुसारेण ज्ञेयानि। अत्राप्यपकर्षः।
यानि कानि च विषयकजननमरणानि श्रुतानि तान्याशौचानि तानि जायापतिभ्यां उभाभ्यामशेषेणानुष्ठेयानि त्या
ति पुनर्भगिनीमातुलादिभिन्नगोत्राशौचानि तेषु जायापतिमध्ये यस्यैक्यं तस्य तेनैवानुष्ठेयं नोभाभ्यामिति।
आहिताग्नेर्मंत्रवद्दाहदिनमारभ्य पुत्रादिभिराशौचं कार्यं। आहिताग्नौ प्रोषिते मृते मंत्रवद्दाहात्पूर्वं पिण्डादी
नामाशौचं संध्यादिकर्मलोपश्च नास्ति। अनाहिताग्नेर्मरणदिनमारभ्य पुत्रादिभिराशौचं कार्यं एव। अथ रा
त्रौ जनने मरणे वा रात्रिं त्रिभागां कृत्वाद्यभागद्वये चेत्पूर्वदिनं तृतीयभागे चेदुत्तरदिनमारभ्याशौचं कार्यं अ
र्द्धरात्रात्प्राक् पूर्वदिनं परतः उत्तरदिनं। आ सूर्योदयात्पूर्वदिनम् (...) उत्तरदिनमिति पक्षत्रयं देशाचारतो
व्यवस्थितं। महाराष्ट्रदेशे तु आद्यपक्षः प्रचरति। अथाशौचसंपाते निर्णयः। तत्र दशाहमृतके दशाहं ततो
न्यूनं वा मृतकमुपस्थितं भवति तदा पूर्वशेषेण शुद्धिः। दशाहे सूतके दशाहं ततो न्यूनं वा सूतकं पतति तदा पू
र्वशेषेण शुद्धिः। सूतकमध्ये दशाहं न्यूनं वा मृतकं पतति तदा तस्य पूर्वेण शुद्धिर्नास्ति। तत्र सूतकस्याल्पशि

राम:
५

ष्ट्वेन मृतकमपि समापनीयं। महागुरुपक्षमृतके सूतके च दशाहमृतकपाते दशाहसूतकपाते पूर्वेण शुद्धिर्नास्ति।
मृतके सूतकस्य समस्य न्यूनस्य वा संपाते पूर्वेण शुद्धिः अधिकस्यापि सूतकस्य शुद्धिरिति शुद्धिविवेककारः। पूर्वा
शौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं चेत् उत्तरमपि कार्यं। दशाहांत्यरात्रौ यदि दशाहमाशौचं पतति तदा
दिनद्वयं अधिकं कार्यं। दशाहांत्यरात्रिचतुर्थयामे यदि दशाहमाशौचं भवेत् तदा दिनत्रयमधिकं कार्यं। महाघा
शौचानां परस्परं रात्रिशेषसंपाते पूर्वेण न शुद्धिर्न च हानिः। ... त्रिदिनमध्ये आशौचांतरसंपाते चाधि
कस्य पूर्वेण शुद्धिर्नास्ति। समन्यूनयोः पूर्वेण शुद्धिर्भवति। सपिण्डाशौचे मातृपितृभर्तॄणामाशौचं मा इति। मात्रा
शौचमध्ये पित्राशौचपाते पूर्वशेषेण न शुद्धिः पितुः संपूर्णाशौचेन शुद्धिरित्यन्ये तेषां शेषपदे संपूर्णलक्षणापत्तिः।
पित्राशौचमध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणीमधिकां कुर्यात् इदं दशमरात्रेरर्वागेव भवति दशमरा
त्रांत्यरात्रिचतुर्थयामे च मातृमरणे तु अहः अहानपक्षिणी। मातृभर्त्रोः सहानुगमारोहणे तु नाधिका पक्षिणी। पूर्वा
शौचेन शुद्धिः। सूतिकायामग्निदेशात् पुत्रे पुत्रजनने प्रेतपुत्रे पुनर्ग्रहणं च मातांतराद्युरोधेन। सूतकमृत
कपाते पिण्डदानप्रतिबंधो नास्ति। मृतके सूतकसंपाते आशौचांते कुर्यात्।

Indira Gandhi National
Centre for the Arts

मातुर्यधिकारपश्यिनीतत्रपितुरेकादशाहंश्राद्धंकुर्यात्॥ शवस्पर्शेतुद्वियावेन्नक्षत्रदर्शनाच्छुद्धिः॥ रात्रौचेत्सूर्यदर्श
नात् तदलाभेतत्कृहवासेयावत्तेषामाशौचं तावदाशौचं॥ संसर्गाशौचेकर्माधिकारोनास्तिकिंतुस्पर्शमा
त्रंतत्कृष्यालंकृत्यालंनाशौचसंबंधः॥ स्नेहेनसवर्णनिर्हारेतदन्नाशनेतत्कृहवासेत्र्यहः॥ गृहवासेअन्ना
भक्षणेनिर्हरणमात्रेकृतेचैकाहः॥ भृतिग्रहेसवर्णनिर्हारेदाहेचतज्जात्याशौचं दशाहादि॥ विजातीयनिर्हारेवि य
जातीयदाहेचशववजातीयमाशौचं॥ भृतिग्रहेणविजातीयनिर्हारेचशवजातीयद्विगुणं॥ सोदकनिर्हारेदशा
हः॥ असपिंडालंकरणेअशक्तानामुपवासः॥ अशक्तौस्नानं॥ शक्ततः पादकृच्छ्रं॥ धर्मार्थमनाथसवर्णनिर्हारक्रि
याकरणेनिदानेचद्विजस्यानंतयज्ञफलं स्नानाच्छुद्धिः॥ प्राणायामेनिस्पर्शश्च॥ धर्मार्थमनाथसवर्णनिर्हा
रादावपिमातुलत्वादिसंबंधेसतित्रिरात्रमाशौचं॥ अनुगमनेतुसपिंडेतुनदोषः॥ असपिंडेपिअनाथक्रियायां
नदोषः॥ समोत्कृष्टवर्णयुशवानुगमनेस्नात्वाकृताग्निस्पृष्टासर्पिः प्राश्यपुनःस्नात्वाप्राणायामंकुर्यात्॥
हीनवर्णशवानुगमनेक्षत्रियेएकाहमाशौचं वैश्येपक्षिणी॥ शूद्रेत्रिरात्रं पूर्ववत्स्नानादिच॥ ब्रह्मचारिणः सपिं
डमरणेनाशौचम्॥ अन्यस्यनिर्हारदाहाद्यौर्ध्वदैहिकेअधिकारोनास्ति॥ तत्करणेपुनरुपनयनंकृच्छ्रप्रायश्चि

रामा
५

त्तं॥ ब्रह्मचारिणः पितृमातृआचार्योपाध्यायमातामहानामंत्यकर्मकरणेदोषोनास्तितत्रदशाहमस्पृश्यत्वलक्षण
माशौचंदशरात्रंसंध्याग्निकार्यादिकर्माधिकारः॥ स्वैकमेकदिनमस्पृश्यत्वमितिमाधवः॥ पित्राद्याशौचेपिआशौ
चिनामलंब्रह्मचारीनस्पृश्येत् अन्यथापुनरुपनयनं॥ ब्रह्मचारिणः पित्राद्यंत्यकर्माकरणेतुपित्रादिमरणेपि
आशौचंनास्तिसमावर्तनोत्तरंपूर्वमृतानांत्रिदिनमाशौचंकार्यमेव॥ कृतजीवच्छ्राद्धेनप्याशौचंनकार्य
मितिहेमाद्रिः॥ वानप्रस्थयतिपतितैरपिकिमप्याशौचंनकार्यं॥ तेषामपिरतरैर्नकार्यं॥ परेषांसवर्णानामौर्ध्व
दैहिककरणेतज्जात्याशौचं कृत्वातुकृच्छ्रत्रयाच्छुद्धिः॥ हीनवर्णौर्ध्वदैहिककरणेतुशवजातीयमाशौचं कृत्वा
कृच्छ्रत्रयद्वैगुण्यंत्रैगुण्यंचातुर्गुण्यादिप्रायश्चित्तमनुष्ठेयं॥ आहिताग्नेरस्थिदाहेप्रकृतिदाहेनासर्वसपिंडा
नांदशाहाद्याशौचं॥ अनाहिताग्नेस्तुअस्थिदाहेपर्णशरदाहेच पत्नीपुत्रयोः पूर्वमगृहीततयोर्दशाहादि
र्णमेवगृहीताशौचयोरेकतयोरपिसंस्कारकालेत्रिरात्रं॥ पत्नीसंस्कारेपक्षः॥ ध्येनं सपत्न्योर्निर्यश्चैवं॥ अन्य
सपिंडानांतुपूर्वमगृहीताशौचानामनाहितानिसंस्कारकालेत्रिरात्रं॥ पूर्वगृहीताशौचानांतुसपिंडानांसंस्का
रकालेस्नानमात्रं॥ इदंत्रिरात्रादिकंदशाहोर्ध्वंसंस्कारकरणेज्ञेयंदशाहमध्येतुशेषदिवसैरेवाशौचसिद्धिः

Indira Gandhi National
Centre for the Arts

२५८

कल्याण: इति श्रीमन्‌ कविरचिता शोभनिर्णयः॰ इदं पुस्तकं भारद्वाज बालंभट्टेन पुणग्रामे लिखितं शाके १६७४

विक्रमानु संवत्सरे मार्गशीर्ष सुदी ८ रवौ तद्दिने समाप्तं श्रीजयतिलमाम्‌ श्रीः श्रीः श्रीः श्रीः

॥श्री रामो जयति तमाम्‌ श्रीराम जय राम जय जय राम